**A-I/4/1323/22**

**प्रथमसत्रार्द्धम्**

**चतुर्थपत्रम्**

**अद्वैतवेदान्तः**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** (15×2=30)

1. "प्राचीनैर्व्यवहारसिद्धविषयेषु. . . . . . . . ." इति श्लोकं लिखत।

2. परिसंख्याविधिः कः?

**अथवा**

'व्रीहीनवहन्ति' इति कस्य विधेः उदाहरणम्?

3. श्रवणविधिवाक्यं लिखत।

4. उपादानं कतिविधं? ब्रह्म जगतः कीदृशमुपादानम्?

5. केषां मते माया द्वारकारणम्?

6. घटाकारवृत्त्या निवर्त्यमानं न मूलाज्ञानं, कुतः?

**अथवा**

उपादानलक्षणं किम्?

7. तत्त्वशुद्धिकारमते कः साक्षी?

**अथवा**

वृत्तिनिर्गमनप्रयोजनं किम्?

8. 'अज्ञोऽस्मि' इत्यज्ञानसम्बन्धानुभवः कस्य?

**अथवा**

कः तैजसः?

9. पूरयत – "घटसंवृतमाकाशं. . . . . . .नभोपमः"।

**अथवा**

पूरयत – "राजसूनो. . . . . . .तत्त्वमस्यादिवाक्यतः"।

10. वाचस्पतिमिश्रमते अज्ञानं किमाश्रितम्?
11. दृग्दृश्यविवेके व्यावहारिको जीवः कः?
12. शुद्धं ब्रह्मैव जगदुपादानमिति केषां मतम्?
13. श्रवणं नाम किम्?
14. रज्ज्वादिविक्षेपोपादानभूतम् अज्ञानं किमाश्रितम्?
15. तत्त्वविवेकानुसारं मायाविद्ययोः को भेदः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. संक्षेपशारीरकानुयायिमते कथं श्रवणे नियमविधिः? इति दर्शयत।
17. चित्तत्त्वस्यचातुर्विध्यप्रदर्शनेन जीवेश्वरविभागं सोदाहरणं वर्णयत।

**अथवा**

ईश्वरः बिम्बः, जीवश्च प्रतिबिम्बः इति मतमुपस्थापयत।

18. कौमुद्योक्तं साक्षिस्वरूपं वर्णयत।

**अथवा**

साक्ष्यानन्दस्य अनावृतत्त्वमुपपादयत।

19. चिदुपरागार्थावृत्तिः इति मतं प्रतिपादयत।
20. एकजीववादे बन्धमोक्षव्यवस्थां विचारयत।

**अथवा**

मायायाः जगत्परिणाम्युपादानत्वपक्षं दर्शयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. अनेकजीववादे बद्धमुक्तव्यवस्थां मतभेदपुरस्सरं प्रतिपादयत।

**अथवा**

ब्रह्मणः सर्वज्ञत्वं कीदृशमिति अत्र मतभेदं प्रदर्शयत।

**अथवा**

साक्षिणः नित्यत्वे कथं अहङ्काराद्यनुसन्धानसम्भवः इत्यत्र मतभेदमुपस्थापयत।